শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী তিরুমলৈ অনন্তার্যস্বামি অনুগৃহীতা

# ॥ শ্রী রামানুজচতুঃশ্লোকী ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী রামানুজচতুঃশ্লোকী ॥

অখিলাত্ম গুণাৱাসং অজ্ঞান তিমিরাপহম্।
আশ্রিতানাং সুশরণং ৱন্দেঽনন্তার্য দেশিকম্॥

শ্রীমদ্ রামানুজাচার্য শ্রীপাদাংভোরুহদ্ৱযম্।
সদুত্তমাঙ্গ সন্তার্যম্ অনন্তার্যমহং ভজে॥

অনিশং ভজতামনন্যভাজাং
চরণাম্ভোরুহমাদরেণ পুংসাম্।
ৱিতরন্নিভৃতং ৱিভূতিমিষ্টাং
জয রামানুজ ! রঙ্গধাম্নি নিত্যম্॥ 1 ॥

ভুৱিনোৱিমতাংস্ত্ৱদীযসূক্তিঃ
কুলিশীভূয কুদৃষ্টিভিস্সমেতান্।
শকলীকুরুতে ৱিপশ্চিদীড্যা
জয রামানুজ ! শেষশৈলশৃঙ্গে॥ 2 ॥

শ্রুতিষু স্মৃতিষু প্রমাণতত্ত্ৱং
কৃপযালোক্য ৱিশুদ্ধযা হি বুদ্ধ্যা।
অকৃথাস্স্ৱত এৱ ভাষ্যরত্নং
জয রামানুজ ! হস্তিধাম্নি নিত্যম্॥ 3 ॥

জয মাযিমতান্ধকারভানো !
জয বাহ্যপ্রমুখাটৱীকৃশানো !।

জয় সংশ্রিতসিন্ধুশীতভানো !
জয় রামানুজ ! যাদবাদ্রিশৃঙ্গে ॥ **4** ॥

রামানুজচতুঃশ্লোকীং যঃ পঠেন্নিয়তস্সদা।
প্রাপ্নুযাৎ পরমাং ভক্তিং যতিরাজপদাব্জযোঃ ॥ **5** ॥

॥ ইতি শ্রী রামানুজচতুঃশ্লোকী সমাপ্তা ॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi